# *वैदिकमन्त्रोच्चारणे पाणिनीयशिक्षायाः योगदानम्*

**वासुमोहनः**

**कूटशब्दाः**-*वेदः, वेदाङ्गम्, शिक्षा, वर्णः, यत्नः, उच्चारणस्थानम्।*

**शोधसारः**-*'अङ्ग्यन्ते ज्ञायन्ते अमीभिरित्यङ्गानि' व्युत्पत्त्याऽनया अङ्गशब्दस्यार्थ 'उपकारक' इति विज्ञायते। अर्थात् वेदानाम् अर्थावगमने स्वरूपनिर्धारणे वा यान्युपकरणानि शास्त्राणि सन्ति, तानि वेदाङ्गानीत्युच्यन्ते। वेदाङ्गानि षड् भवन्ति। तेषु शिक्षावेदाङ्गस्य महत्त्वपूर्णं स्थानं वरीवर्ति। 'वर्णस्वराद्युच्चारणविधिः शिक्ष्यते यया सा शिक्षा' व्युत्पत्त्यानया ज्ञायते यद्वर्णानामुच्चारणप्रक्रियैव मुख्यरूपेण शिक्षाग्रन्थेऽस्य अवबोध्यते। तत्रापि को वर्णः कस्मात्स्थानादुच्चर्यते? कश्च तत्र यत्नः? का वर्णोत्पत्तिप्रक्रिया? कति स्वराः? कति वर्णाः? इत्यादिकं सर्वमपि पाणिनीयशिक्षायां समुपलभ्यते।*

**उपोद्घातः**

इह खलु विश्वस्मिन् विश्वे समुपलब्धेषु सर्वेषु ग्रन्थेषु वेदाः प्राचीनतमा इति जानते एव सर्वे जनाः। 'विद् ज्ञाने' इति धातोः घञि प्रत्यये कृते वेद इति रूपं निष्पद्यते। विद्-सत्तायाम्, विद्लृ- लाभे, विद्-विचारणे, विद्-चेतनाख्याननिवासेष्विति चतुर्ष्वर्थेषु विद्-धातोः वेदशब्दस्य निरुक्तिं व्याचक्षाणः स्वामिदयानन्दसरस्वती आह-

''विदन्ति जानन्ति, विद्यन्ते भवन्ति, विन्दन्ति विन्दन्ते लभन्ते, विदन्ति विचारयन्ति सर्वे मनुष्याः सर्वाः सत्याविद्याः यैर्येषु वा तथा विद्वांसश्च भवन्ति ते वेदाः''[१] इति।

वेदाः सन्ति ज्ञानविज्ञानराशयः। वेदानां सुष्ठुरूपेण अर्थावबोधनार्थं वेदाङ्गानां वेविद्यते किमपि गौरवास्पदं महत्त्वपूर्णं स्थानम्। वेदाङ्गानि यथा-

> **''शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसाञ्चयः।**
> **ज्योतिषामयनं चैव वेदाङ्गानि षडेव तु।।''**

**शिक्षावेदाङ्गे पाणिनीयशिक्षा-**

शिक्षाग्रन्थेष्वपि पाणिनीयशिक्षा चकास्ति। पाणिनीयशिक्षा पिङ्गलाचार्येण विरचितेति केचन विद्वांसः स्वीकुर्वन्ति। अपरे तु महर्षिणा पाणिनिना प्रोक्तेति मन्यमानाः सन्ति। शिक्षेयं न महर्षिणा पाणिनिना प्रोक्तेति ये स्वीकुर्वन्ति तेषामाशयस्त्वयं यत् पाणिनीयशिक्षायां पाणिनिस्तुत्यात्मकाः श्लोकाः दरीदृश्यन्ते। यथा-

> **''येनाक्षरसमाम्नायमधिगम्य महेश्वरात्।**
> **कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः।।''**[२]

अपि च-

> **''अज्ञानान्धस्य लोकस्य ज्ञानाञ्जनशलाकया।**
> **चक्षुरुन्मीलितं येन तस्मै पाणिनये नमः।।**[३]

अत: कृतिरियं पिङ्गलाचार्यस्यैव भवेदिति। किन्तु अद्वैतवेदान्तशास्त्रनदीष्णा आचार्यमधुसूदनसरस्वतीमहोदया: शिवमहिम्नस्तोत्रे 'अथ शिक्षां प्रवक्ष्यामि' इत्यारभ्य 'नवखण्डात्मिका पाणिनिना प्रकाशिते'ति भणन्ति। अत: कृतिरियं महर्षिपाणिनैव प्रोक्तेति केचन। शिक्षायामस्यां वैदिकमन्त्रोच्चारणस्य विपुला विशदा च वैज्ञानिकी विवेचना दरीदृश्यते। सम्प्रति वैदिकमन्त्रोच्चारणे पाणिनीयशिक्षाया: योगदानमिति निरूप्यते।

**पाणिनीयशिक्षायां वर्णोच्चारणस्थानानि–**

वर्णानामुच्चारणस्थानानि अष्टौ भवन्तीति। तथा चोक्तमस्याम्–

**''अष्टौ स्थानानि वर्णानामुर: कण्ठ: शिरस्तथा।**

**जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च।।''**[४]

किञ्च वर्णानामुच्चरणस्थानं विज्ञायते चेत् तर्हि तेषां वर्णानामुच्चारणमपि सुष्ठु शुद्धो भवति। अत: कस्य वर्णस्य किं स्थानमिति जिज्ञासायां निगदति पाणिनीयशिक्षाकार:–

**''कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपु।**

**स्युर्मूर्धन्या ऋटुरषा दन्त्या लृतुलसा: स्मृता:।।''**[५]

कण्ठ्यावहौ नाम अकारहकारयोरुच्चारणस्थानं कण्ठो भवति। इचुयशास्तालव्या: नाम इकार–चवर्ग–यकार–शकाराणामुत्पत्तिस्थानं तालु भवति। ओष्ठजावुपु अर्थात् उकारपवर्गौ ओष्ठस्थानोद्भूतौ भवत:। ऋकार–टवर्ग–रकार–षकाराणामुत्पत्तिस्थानं मूर्धा भवति। लृकार–तवर्ग–लकार–सकाराणां दन्त्यस्थानमिति।

अपि च–

**''जिह्वामूले तु कु: प्रोक्तो दन्त्योष्ठ्यो व: स्मृतो बुधै:।**

**ए ऐ तु कण्ठतालव्या ओ औ कण्ठोष्ठजौ स्मृतौ।।''**[६]

अर्थात् विद्वत्तल्लजै: कवर्गस्योच्चारणस्थानं जिह्वामूलं तथा च वकारस्योच्चारणस्थानं दन्तोष्ठमिति मतम्। किञ्च एकारस्य ऐकारस्य च कण्ठतालुस्थानं तथा ओकारस्य औकारस्य च कण्ठोष्ठस्थानं भवति।

**पाणिनीयशिक्षायां वर्णोच्चारणविधि:–**

पाणिनीयशिक्षायां वर्णोच्चारणविधिरपि सुष्ठुरूपेण प्रत्यपादि पाणिनीयशिक्षाकारेण। वर्णोच्चारणविधिं जानाति यदि कश्चन तदा वैदिकमन्त्रोच्चारणेऽपि अपेक्षिता शुद्धता प्राप्यते एव। शिक्षायामस्यां सदृष्टान्तं वर्णोच्चारणविधिमेवमुवाद पाणिनीयशिक्षाकार:–

**''व्याघ्री यथा हरेत् पुत्रान् दंष्ट्राभ्यां न च पीडयेत्।**

**भीता पतनभेदाभ्यां तद्वद्वर्णान्प्रयोजयेत्।।''**[७]

अर्थात् व्याघ्री पतनभेदाभ्यां भीता स्वपुत्रान् सावधानतया दंष्ट्राभ्यां धृत्वाऽन्यत्र नयति। यदि शिथिलतया तान् नयति तदा पतनभयो भवति, कठोरतया नयति चेत् भेदनभयो भवति। अत एव यथा सचेष्टभावपूर्वकं

स्वपुत्रान् नयति व्याघ्री तद्वदेव वेदोच्चारयिता सदैव सावधानतया वेदमन्त्राणामुच्चारणं कुर्यादिति। अर्थात् यस्य वर्णस्य यदुच्चारणस्थानं यश्च प्रयत्नः, तान्नवलज़्ब्यैव मन्त्रोच्चारणं भवेदित्यभिप्रायः।

**उच्चारणविषयकौ गुणदोषौ–**

शिक्षायामस्याम् उच्चारणविषयकौ गुणदोषावपि शिक्षायामस्यां निरूपितौ दृश्येते। उच्चारणविषयकान् गुणान् प्रतिपादयन् निरूपयति पाणिनीयशिक्षाकारः–

**''माधुर्यमक्षरव्यज्तिः पदच्छेदस्तु सुस्वरः।**

**धैर्यं लयसमर्थं च षडेते पाठका गुणाः।।''**[८]

अर्थात् माधुर्यं नाम सुश्राव्यम्, अक्षरव्यज्तिः स्पष्टरूपेण वर्णोच्चारणम्, पदच्छेदः पदविभागस्य ज्ञानं, सुस्वरः स्वरोपेतोच्चारणम्, धैर्यं सावधानतया धैर्ययुज्तमुच्चारणम्, एवमेव लयसमर्थं लयोपेतमुच्चारणमेते षड्–गुणाः पाठकस्य भवन्तीति। एवम् पाठदोषान् निगदन् ब्रवीति शिक्षाकारः–

**''शङ्कितं भीतिमुद्घृष्टमव्यज़्तमनुनासिकम्।**

**काकस्वरं शिरसिगं तथा स्थानविवर्जितम्।।''**[९]

अपि च–

**''उपांशुदष्टं त्वरितं निरस्तं विलम्ब्रितं गद्गदितं प्रगीतम्।**

**निष्पीडितं ग्रस्तपदाक्षरं च, वदेन्न दीनं न तु सानुनास्यम्।।''**[१०]

अर्थात् शङ्कितं सन्देहसज़्पृज़्तम्, भीतिम्, उद्घृष्टं प्रकृष्टध्वनिसंयुज़्तम्, अस्पष्टम्, निरनुनासिकवर्णस्यापि सानुनासिकोच्चारम्, कर्कशोच्चारणम्, मूर्धापीडकं तीव्रोच्चारणम्, उच्चारणस्थानविवर्जितमुच्चारणम्, अन्तर्मुखजल्पितं, क्षिप्रमुच्चारणम्, निष्ठुरतयोच्चारणम्, विलज़्बेनोच्चारणम्, शिथिलोच्चारणम्, प्रमत्तभावेनोच्चारणम्, वर्णनिष्पीडनपूर्वकमुच्चारणम्, ग्रस्तपदाक्षरम्, वर्णोच्चारणोत्साहरहितम्, सानुनास्यञ्च अष्टादशदोषाः पाठने भवन्ति।

अभिप्रायस्त्वयं यः वैदिकमन्त्रस्य पाठक एतौ गुणदोषौ ज्ञात्वा सावधानतया उदात्तादिस्वरसूचकहस्तेन वैदिकमन्त्रोच्चारणं करोति, सः वेदैः पूतः भूत्वा ब्रह्मलोके महीयते। यथा च–

**''हस्तेन वेदं योऽधीते, स्वरवर्णार्थसंयुतम्।**

**ऋग्यजुः समाभिः पूतो ब्रह्मलोके महीयते।।''**[११]

इति शिवम्।

१. ऋग्वेदभाष्यभूमिका, पृष्ठसङ्ख्या–२९

२. पा. शि.–५७

३. पा. शि.–५९

४. पा. शि.–१३

५. पा. शि.–१७

६. पा. शि.–१८

७. पा. शि.–२५

८. पा. शि.–३३

९. पा. शि.–३४

१०. पा. शि.–३५

११. पा. शि.–५५

## सन्दर्भग्रन्थाः


१. पाणिनीयशिक्षा–डॉ. सत्यप्रकाशदुबे, राजस्थानीग्रन्थागारः, जोधपुरम्, २००४

२. शिक्षाशास्त्रम्–महर्षिपाणिनीः, उदयनाचार्यः, रामलालकपूरट्रस्टः, सोनीपत, २००८

३. वैदिकशिक्षास्वरूपविमर्शः–डॉ. राममूर्तिचतुर्वेदी, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, २००३

४. ऋग्वेदादिभाष्यभूमिका–महर्षिदयानन्दसरस्वती, वैदिकपुस्तकालयः, अजमेरम्, २००८